25 | 2020 Wednesday November

330-036 • WK 48

| 11 | November 2020 | | | | | | |
|---|---|---|---|---|---|---|---|
| wk | M | T | W | T | F | S | S |
| 44 | 30 | | | | | | |
| 45 | 2 | 3 | 4 | 5 | 6 | 7 | 1 |
| 46 | 9 | 10 | 11 | 12 | 13 | 14 | 8 |
| 47 | 16 | 17 | 18 | 19 | 20 | 21 | 15 |
| 48 | 23 | 24 | 25 | 26 | 27 | 28 | 22 |
| | | | | | | | 29 |

महा वि० का नाम

आ० वि० सं० महावि० रहीमपुर, खगड़िया।

दिनाङ्क – 9.12.2020

उपशास्त्री द्वितीय वर्ष

व्याकरण

भाग – 93

विषय – ~~[illegible]~~ बहुव्रीहि समास प्रकरणम्।

अस्तिक्षीरादयो बहुव्रीहावुपसंख्येया इत्यर्थः। अस्तिक्षीरा गौरित्यत्र अस्तीत्यस्य तिङन्ततया प्रथमाविभक्त्यन्तत्वाभावादप्राप्ते बहुव्रीहाविदं वचनम्। वस्तुतस्तु वचनमिदं नारब्धव्यमित्याह – 'अस्तीति विभक्तिप्रतिरूपकमव्ययमिति'। विभक्तिप्रतिरूपकत्वेन निपातितत्वादस्तीति 'स्वरादिनिपातमव्ययम्' इत्यव्ययं विद्यमानार्थकम्। ततः सोः 'अव्ययादाप्सुपः' इति लुकि प्रत्ययलक्षणेन प्रथमान्तत्वादेव सिद्धेः वचनं न कर्तव्यमिति भावः। तदुक्तं भाष्ये – 'अस्तिक्षीरादिवचनं नाव्ययत्वात्' इति। स्त्रियाः पुंवत्। भाषितपुंस्कादनूङिति समस्तमेकं पदं स्त्रिया इति षष्ठ्यन्तस्य विशेषणमित्यभिप्रेत्य व्याचष्टे – 'भाषितपुंस्कादिति'। अनूङित्यस्य व्याख्यानम् 'ऊङोऽभाव इति'। अर्थाभावेऽव्ययीभावः, नञ्तत्पुरुषो वा। भाषितपुंस्कादिति दिग्योगे पञ्चमी, पर इति प्रथमान्तमध्याहार्यम्। तथा च भाषितपुंस्कात् परः अनूङ् यस्या इति विग्रहे बहुव्रीहिरिति फलितम्। ननु समासे सति पञ्चम्या लुक्प्रसङ्ग इत्यत आह – 'निपातनात् पञ्चम्या अलुगिति'। इदमुपलक्षणम्। निपातनादप्रथमान्तस्यापि बहुव्रीहिः परशब्दलोपश्चेत्यपि बोध्यम्। यद्वा, अत एव निपातनादप्रयुज्यमानेऽपि परशब्दे तदर्थे गम्ये पञ्चमी। नन्वेवमपि स्त्रिया इति षष्ठ्यन्तस्य 'भाषितपुंस्कादनूङ्' इति यदि विशेषणं

NOTES

स्यात्, तर्हि 'भाषितपुंस्कादनूङ्' इति षष्ठी श्रूयेतेत्यत आह — 'षष्ठ्याश्च लुगिति'। निपातनादित्यनुषज्यते। भाषितः पुमान् येन तद्भाषितपुंस्कम्, तदस्यास्तीति अर्श आद्यच्। पुंस्त्वे स्त्रीत्वे च एकप्रवृत्तिनिमित्तकमिति यावत्। 'तृतीयादिषु भाषितपुंस्कम्' इत्यत्र व्याख्यातमेतत्। तदाह — 'तुल्ये प्रवृत्तिनिमित्त इति'। 'स्त्रीवाचकस्य शब्दस्येति'। स्त्रीलिङ्गस्येत्यर्थः। स्त्रिया इति षष्ठ्यन्तम् न स्त्रीप्रत्ययपरमिति भावः। पुंवदिति रूपातिदेशः पुंस इव पुंवदिति षष्ठ्यन्ताद्वतिः। तदाह — 'पुंवाचकस्येव रूपमिति'। स्त्रियामिति सप्तम्यन्तमपि न स्त्रीप्रत्ययपरं किन्तु स्त्रीलिङ्गपरम्। तच्च 'अलुगुत्तरपदे' इत्यधिकृते उत्तरपदेऽन्वेति। तदाह — 'स्त्रीलिङ्गे उत्तरपद इति'। अपूरणीप्रियादिष्वित्येतद्व्याचष्टे — 'न तु पूरण्यां प्रियादौ च परत इति'। पूरणीति स्त्रीलिङ्गनिर्देशात् स्त्रीलिङ्गः पूरणप्रत्ययान्तो विवक्षित इति ध्येयम्। तुल्ये ~~प्रवृत्ति~~ प्रवृत्तिनिमित्त इति किम्, कुटीभार्यः। अत्र पुंवत्त्वं न भवति, कुटीशब्दो घटे पुंलिङ्गः, गेहे तु स्त्रीलिङ्ग इति प्रवृत्तिनिमित्तभेदात्। स्त्रीप्रत्ययः पुंवत्त्वादित्युक्तं तु स्त्रीप्रत्ययस्य लोपः पर्यवस्येत्। ततश्च पट्वी भार्या यस्य स पटुभार्य इत्यत्र उत्तरपदं परनिमित्तमाश्रित्य ङीषो लोपे तस्य 'अचः परस्मिन्' इति स्थानिवत्त्वादुकारस्य यण् स्यात्। 'ह्रस्व इति'। चित्रा गावो यस्येति विग्रहे बहुव्रीहि समासे सुब्लुकि सति अनेकमिति प्रथमान्तनिर्दिष्टतया, विग्रहे नियतविभक्तिकतया वा उपसर्जनत्वे सति चित्रगोशब्दे ओकारस्य 'गोस्त्रियोः' — इत्युकारो ह्रस्व इत्यर्थः। ननु चित्रा गाव इति लौकिकसमासाभ्युपगमे, सुपो लुकः प्राक् चित्रा अस् इत्यत्र पूर्वसवर्णदीर्घे गो अस् इत्यत्र पूर्वरूपे च एकादेशे कृते तस्य परादिवत्त्वेन आतो लुकि चित्रशब्दे आकारो न श्रूयेत चित्रगुरित्यत्र उकारश्च न श्रूयेत,।

दिनेश प्र० सिंह
गेस्ट प्रोफेसर
(व्याकरण)

Scanned with CamScanner